अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा
स्नातककार्यक्रमः – वेदपौरोहित्यकर्मकाण्डम्
2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली-110002

UGC LOCF (Sanskrit) Committee

Prof. Shrinivasa Varakhedi
Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058
✉vc@sanskrit.nic.in
Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com
Prof. Viroopaksha V. Jaddipal
Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain, ✉ vvjaddipal@gmail.com
Dr. M. V. Natesan
(Retd Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10, ✉ natesanskt2000@gmail.com
Dr. Mamta Tripathi
Assistant Professor, Gargi College, University of Delhi, Delhi, ✉ mamtatripathi.jnu@gmail.com

Curriculum Development Committee for B.A. Hons. (Veda-Paurohitya-Karmakandam)

Prof. Viroopaksha V Jaddipal
Chairperson of the committee and Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain ✉ vvjaddipal@gmail.com
Prof. Manoj Kumar Mishra
HoD. of Veda, Paurohitya & Karmakanda, Central Sanskrit University, New Delhi,
✉ vedanga.mkmishra@gmail.com
Shri Satyam Shukla
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan -Ujjain ✉ rigvedisatyam@gmail.com
Shri Chidanand Shastri
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain ✉ shastri.cg@gmail.com
Shri Saurav Nautiyal
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain ✉ saurabh96.delhi@gmail.com
Dr. D. Dayanath
Convenor of the committee and Asst. Professor (Veda), Central Sanskrit University, New Delhi
✉ sridayanath@gmail.com

Co-Ordination Committee

Dr. G. Surya Prasad
Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058 ✉ dr.gsurya.prasad@csu.co.in
Dr. Yashvant Kumar Trivedi
Asst. Professor, Central Sanskrit University, New Delhi – 110058, ✉ dr.yashvant.trivedi@csu.co.in
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉ dr.awasthisailesh@csu.co.in
Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉dr.kishor_kumar@csu.co.in
Dr. Deepika Dixit
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉ dr.deepikadixit@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः
(Introduction of the Program)

बी.ए. आनर्स् (वेदपौरोहित्यकर्मकाण्डम्) कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां छात्राणां सर्वेषां वेदपौरोहित्यकर्मकाण्डस्य स्नातकपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः Learning Outcome-based Curriculum Framework (LOCF) इत्यस्य आधारेण निरूपितः अस्ति, यः विविधविश्वविद्यालयेषु अनुसर्तुं योग्यः अस्ति।

LOCF - पद्धतिः स्नातकस्तरे लक्ष्यकेन्द्रितस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः "छात्रकेन्द्रितायाःशिक्षण-अधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवति इति अभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः छात्राणाम् अधिगमानुभवे स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः यथेच्छं स्वीयपाठ्यक्रमे संलग्नाःभवन्ति। ईदृशः स्नातकपाठ्यक्रमः छात्राणां न केवलं वेदविषये शिक्षणं प्रददाति अपितु व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति।

LOCF - पद्धतिः पाठ्यक्रमस्य स्वभावं स्वरूपं वा विस्तरेण वर्णयति। अपि च पाठ्यक्रमस्य अध्ययनाद् यानि यानि फलानि प्राप्यन्ते, तान्यपि सूचयति। अनया पद्धत्या स्नातकस्तरपाठ्यक्रमात् व्यज्यमानाः गुणाः निर्दिश्यन्ते। एते गुणाः स्वास्थ्यं, भावनात्मकसंतुलनं, समालोचनात्मकचिन्तनं, सामाजिकन्यायः एवं औद्योगिककौशलानि भवन्ति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनयोग्यतां, स्थिरजीवनं च जनयति। भारतीयदर्शनाध्ययनविषये दृष्टिकोणं च परिवर्तयति।

बी.ए.ऑनर्स् (वेदपौरोहित्यकर्मकाण्डम्) इत्यस्मिन् पाठ्यक्रमे विविधवैदिकविषयान् आधृत्य समीक्षात्मकानि, विमर्शात्मकानि, विशिष्टचिन्तनपराणि लेखनानि रचयितुं वैदिककार्यक्रमान् याग-होमादीन् वा आयोजयितुं स्रोतः समुपलभ्यते। अयं पाठ्यक्रमः अंतर्विषयात्मकपद्धतिम् अनुसरति यया छात्राः वेदस्य संक्षिप्तं, गूढं च परिचयं प्राप्नुवन्ति, ये च अन्यान्विषयान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टां जिज्ञासां प्राप्नुवन्ति। अयं पाठ्यक्रमः मानवजीवनकौशलेन, सामाजिकविज्ञानेन, अध्यात्मविज्ञानेन च सह सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः वेदानां तदुपदिष्टकर्मणां च विश्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति।

एषः पाठ्यक्रमः छात्रेषु सर्वोत्तमं बौद्धिकसामर्थ्यं जनयितुं रचितः अस्ति। येन छात्रः व्यक्तित्वविकासं सामाजिकजीवनविकासं च आसादयितुं समर्थः भवेत्।

अयं पाठ्यक्रमः वेदाध्ययनस्य सामान्यरूपेण प्रचलितान् दृष्टिकोणान् आविष्कर्तुम् अन्यथाधारणां च अपाकर्तुं, तद्द्वारा भारतीयदर्शनाध्ययने छात्राणां रुचिं च जनयितुं संरचितः वर्तते। अयं कार्यक्रमः छात्राणां अधिकतमां नमनीयतां (Flexibility) कल्पयितुम् आयोज्यते।

अत्र मुख्यविषयान्तर्गतानि पत्राणि सन्ति, यानि वेदविषये मूलभूतं ज्ञानं, समीक्षात्मकं तार्किकं च चिन्तनं, तुलनात्मकं ज्ञानं, विमर्शात्मकं विवेचनात्मकम् अध्ययनं च यथावत्प्रयच्छन्ति। अयं पाठ्यक्रमः एवमपि दृष्टिगतः स्यात्, यत्छात्राः स्वस्वरुच्यनुसारं शिक्षां स्वयमेव समनुनयन्तु इति निमित्तेन अनेकविकल्पान् प्रदातुं नियोजितः अस्ति इति।

पाठ्यक्रमोऽयं न केवलं वेदानाम् अपितु वेदोपदिष्टकर्मणां ज्ञानं कौशलं च संवर्धयति। अन्येषु विषयेषु अपि आवश्यकानि कौशलानि संवर्धयति। बी.ए. ऑनर्स् वेदपौरोहित्यकर्मकाण्डपाठ्यक्रमः अंतश्शास्त्रीयः बहुशास्त्रीयश्च अस्ति। यः विविधविषयेषु विशेषज्ञानं प्राप्तुं सहायकः अस्ति्। यश्च अन्यविषयाणां सम्बद्धकौशलानां प्राप्त्युपायः भवति। एतस्य पाठ्यक्रमस्य मुख्यविषयाः (Core), अंतश्शास्त्रीय-बहुशास्त्रीय-वैकल्पिकपाठ्यक्रमाणां (Interdisciplinary, Multidisciplinary, Electives), कौशलवर्धनपाठ्यक्रमाणां (Skill Enhancement Courses) च सम्यक्संयोजनम् आवहति। अनेन वेदस्य अध्ययनं कुर्वन् छात्रः तदितरसंबद्धविषयेभ्यः अपि यथायोग्यं ज्ञानं लभते।

स्वरूपं विस्तृतिः च (Nature and Scope)

बी.ए. ऑनर्स् वेदकर्मकाण्डपौरोहित्यपाठ्यक्रमः चतुर्वर्षीयः अस्ति। प्रतिवर्षं द्वौ द्वौ सत्रौ भवतः। अतः सम्पूर्णपाठ्यक्रमे अष्टौ सत्राणि भवन्ति। प्रतिसत्रं षोडशसप्ताहपर्यन्तः अध्ययनाध्यापनमूल्याङ्कनकालः निश्चितो भवति। अस्मिन्पाठ्यक्रमे अध्यापनम् अध्ययनं च सैद्धान्तिककक्षाभिः व्याख्यानरूपेण (Lecture) तथा प्रशिक्षणकक्षाभिः (Tutorial) सह सम्पन्नं भवति। पाठ्यक्रमः औपचारिकव्याख्यानैः सह अध्याप्यते, यत्र Powerpoint प्रस्तुतीनां, Audio-Video उपकरणानां च उपयोगः करणीयः। यथायोग्यमवसरः प्राप्तः चेत् अन्यानि शिक्षणसाधनानि अपि प्रयोक्तुं शक्यन्ते।

केषुचित्पाठ्येषु अतिरिक्तानि अपेक्ष्यानि भवन्ति, यथा – वृत्तचित्रदर्शनम् (Documentary), चलनचित्रदर्शनम्, क्षेत्रकार्यं (Field Work), अभिलेखसंग्रहणम् (Archival Work), विविधविदुषां/संस्थानां दर्शनम् (Interaction with Scholars and Visit to Gurukula), परियोजनायाः कार्यम् (Project Work), वैदिकयज्ञेषु भागग्रहणम् इत्यादीनि। एतानि नियमिताध्यापनसहितं सम्यक्समायोज्यन्ते।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवं प्रकारेण निर्दिष्टं भवति -

1. छात्रेभ्यः वैदिकपरम्परायाः ज्ञानस्य प्रदानम्।
2. एतत् ज्ञानं समाजस्य श्रेयसि कथम् उपयोगी भवति, इति शिक्षणम्।
3. वैदिकाः ऋषयः आचार्याश्च कथम् अनुसन्धानम् अकुर्वन्, अधुना कुर्वन्ति, कथं मीमांसादिशास्त्रमाश्रित्य वेदवाक्येषु विवाद-समाधानं कुर्वन्तीत्यस्य ज्ञानप्रापणम्।
4. प्राचीनज्ञानपरम्परायाः अध्ययनात् अधुनातनजीवनस्य निर्माणम्।
5. अतीतवर्त्तमानयोः ज्ञानकर्मणोः परस्परंसम्बद्धतायाः ज्ञानप्रदानम्।
6. छात्राणां चिन्तनकौशल-जीवनकौशल-विश्लेषणशक्ति-तार्किकचिन्तनानां वर्धनम्।
7. अनुसन्धानाभिमुखदृष्टेः प्रदानम्।

कार्यक्रमस्य परिणामाः

(Outcomes of the Program)

कार्यक्रमस्य परिणामः – 1	**भारतीयमूलानि -** वैदिकपरम्परायाः मूलज्ञानं प्रदाय कुशलविश्लेषकचिन्तकानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 2	**भारतीयज्ञानपरम्परा** – भारतीयज्ञानपरम्परायै वेदस्य अभिन्नाङ्गत्वस्य अवबोधः।
कार्यक्रमस्य परिणामः – 3	**भविष्यवाद्युपागमः -** वेदेषु निपुणत्त्वेन छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 4	**भविष्यवाद्युपागमः** - वैदिकसिद्धान्तानां व्यावहारिकानुप्रयोगे कुशलान् छात्राण् निर्माय तेषां नैतिकतासंवर्धनम्।
कार्यक्रमस्य परिणामः – 5	**बहुशास्त्रीयम् -** वेदेषु प्रतिपादितान् लोकोपयोगिनः मौलिकान् नियमान् समाजे सप्रमाणं प्रतिपादयितुं समर्थानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 6	**वृत्तिप्रदानक्षमता -** छात्रान् व्यावसायिक-विश्लेषणात्मकप्रौद्योगिकी-कौशलेन सुसज्जितान् कृत्वा तेषां वृत्तिसामर्थ्यस्य वर्धनम्।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्
(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
पाणिनीयशिक्षा	✓	✓	✓	✓	✓	✓	✓
निरुक्तम् (प्रथमाध्यायः)	✓	✓	✓	✓	✓	✓	✓
पञ्चाङ्गपूजनम्	✓	✓	✓	✓	✓	✓	✓
यज्ञपात्रपरिचयः	✓	✓	✓	✓	✓	✓	✓
वैदिकवाङ्मयस्येतिहासः (संहिताब्राह्मणारण्यकोपनिषत्परिचयः) चरणव्यूहः च	✓	✓	✓	✓	✓	✓	✓
मीमांसापरिभाषा	✓	✓	✓	✓	✓	✓	✓
निरुक्तम् (द्वितीयाध्यायः)	✓	✓	✓	✓	✓	✓	✓
वैदिकच्छन्दांसि	✓	✓	✓	✓	✓	✓	✓
याज्ञवल्क्यशिक्षा	✓	✓	✓	✓	✓	✓	✓
वैदिकवाङ्मयस्येतिहासः (वेदाङ्गस्येतिहासः)	✓	✓	✓	✓	✓	✓	✓
स्मार्तयागपद्धतिः	✓	✓	✓	✓	✓	✓	✓
निरुक्तम् (पञ्चमाध्यायः)	✓	✓	✓	✓	✓	✓	✓
उपनयनोपाकर्मप्रकरणम्	✓	✓	✓	✓	✓	✓	✓

सभाष्यसूक्ताध्ययनम् - 1	✓	✓	✓	✓	✓	✓	✓
सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका	✓	✓	✓	✓	✓	✓	✓
निरुक्तम् (सप्तम-अष्टमाध्यायौ)	✓	✓	✓	✓	✓	✓	✓
अग्निहोत्रब्राह्मणम्	✓	✓	✓	✓	✓	✓	✓
नीतिमञ्जरी (प्रथमाध्यायः)	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् - 2	✓	✓	✓	✓	✓	✓	✓
अग्न्याधानं, हविर्यज्ञाः, सोमसंस्थाः च	✓	✓	✓	✓	✓	✓	✓
निरुक्तम् (9-10 अध्यायौ)	✓	✓	✓	✓	✓	✓	✓
जैमिनीयन्यायमाला (प्रथमाध्यायः)	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् - 3	✓	✓	✓	✓	✓	✓	✓
श्रौतयज्ञपरिभाषा (का.श्रौ.सू 1)	✓	✓	✓	✓	✓	✓	✓
वैदिकीप्रक्रिया	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् – 4	✓	✓	✓	✓	✓	✓	✓
शिक्षावल्ली (शाङ्करभाष्यसहिता)	✓	✓	✓	✓	✓	✓	✓
वैदिकस्वरप्रक्रिया	✓	✓	✓	✓	✓	✓	✓
स्वाध्यायब्राह्मणम् (तै.आ. 2)	✓	✓	✓	✓	✓	✓	✓
लघुजातकम्, वास्तुरत्नाकर	✓	✓	✓	✓	✓	✓	✓

विवाहप्रकरणम्	✓	✓	✓	✓	✓	✓	✓
केनोपनिषद् (शाङ्करभाष्यम्)	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MINOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
रुद्राध्यायः – 1	✓	✓	✓	✓	✓	✓	✓
रुद्राध्यायः – 2	✓	✓	✓	✓	✓	✓	✓
नारदीयशिक्षा	✓	✓	✓	✓	✓	✓	✓
सामवेदभाष्यभूमिका (सायणविरचिता)	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् - 1	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् - 2	✓	✓	✓	✓	✓	✓	✓
प्रातिशाख्यविस्तरः	✓	✓	✓	✓	✓	✓	✓
माण्डूकी शिक्षा	✓	✓	✓	✓	✓	✓	✓
बौधायनधर्मसूत्रम्	✓	✓	✓	✓	✓	✓	✓
पाकयज्ञाः हविर्यज्ञाश्च	✓	✓	✓	✓	✓	✓	✓
बृहदवकहडाचक्रम्	✓	✓	✓	✓	✓	✓	✓
पूजाविधानम्	✓	✓	✓	✓	✓	✓	✓
आश्वलायनश्रौतसूत्रम् (चिताः अंशाः)	✓	✓	✓	✓	✓	✓	✓
कात्यायन शुल्बसूत्रम्	✓	✓	✓	✓	✓	✓	✓

वेदपौरोहित्यकर्मकाण्डस्नातकस्य गुणाः

वेदपौरोहित्यकर्मकाण्डपाठ्यचर्यायाः स्नातकस्य गुणाः

पाठ्यक्रमस्य समापनानन्तरं छात्राः समालोचनात्मकचिन्तनस्य, युक्तियुक्तपरीक्षणस्य, प्रभावपूर्णसंवादस्य च कौशलानि अर्जयिष्यन्ति। ते श्रुतिप्रदिपादितं धर्माधर्मं विवेक्तुं शक्नुवन्ति। मानवसमाजस्य अध्ययनाय यः वैदिकसिद्धान्तः अतीव महत्त्वपूर्णः अस्ति, तस्मिन् अपि संवेदनशीलाः भविष्यन्ति। बी.ए. ऑनर्स् वेदपौरोहित्यकर्मकाण्डपाठ्यक्रमे स्नातकापेक्षिताः निम्नलिखिताः गुणाः भवन्ति -

GA1	वेदानां तत्परम्परायाश्च ज्ञानं, येन भारतवर्षे प्राचीनकालात् आधुनिककालपर्यन्तं वेदवाङ्गस्य विकासस्य बोधः स्यात्।
GA2	भारते विदेशे अन्यशास्त्रेषु च वेदस्य प्रभावः कीदृश इति बोधः स्यात्।
GA3	जटिलानां वैदिकवाक्यानां विवादानां च सम्यक्पठनं, तत्र उपस्थापितप्रमाणानां मूल्याङ्कनं, तर्कविन्यासस्य सम्यगवबोधः, तस्य समालोचनात्मकविमर्शः च।
GA4	दीर्घकालपर्यन्तं तथा विभिन्न-सांस्कृतिक-भौगोलिकक्षेत्रेषु प्रवृत्तानां वैदिकचिन्तनानां प्रतिमानानां विश्लेषणक्षमता।
GA5	सामाजिक-सांस्कृतिकविषयेषु वेदानां प्रभावः ज्ञायते। ऐतिहासिकदृष्ट्या वेदानां परिचयः च ज्ञायते।
GA6	राष्ट्रीयभावना-पुरुषार्थविवेक-मानवमूल्य-संवैधानिकमूल्य-धर्मेषु च सम्मानबुद्धिःसमुत्पद्यते।
GA7	व्यक्तित्वविकसनं तथा उपर्युक्तविश्लेषणशक्तीनां सम्पादनं भवति।
GA8	संस्कृतौ परम्परायां च श्रद्धा, चिन्तनशक्तेः संवर्धनं देशस्य विविधतायाः अवगमनं च भवति।

वेदपौरोहित्यकर्मकाण्डस्नातकानां योग्यतासंसूचकानि

पाठ्यक्रमस्य समुचितरीत्या समापनानन्तरं छात्राः वेदपौरोहित्यकर्मकाण्डे स्नातकपदवीं, B.A. Hons. (Veda-Paurohitya-Karmakanda) प्राप्नुवन्ति। अस्य विषयस्य स्नातकाः विभिन्नज्ञानक्षेत्रेषु, औद्योगिकक्षेत्रेषु च संलग्नाः आत्मसंतोषजनकं कार्यं सम्पादयितुं समर्थाः भविष्यन्ति। ते वेदे प्रमुखानां ग्रन्थानां ज्ञानं सम्पाद्य वेदसम्बद्धैः विद्वत्संवादैः सह सम्बन्धं च स्थापयितुं शक्नुवन्ति। एषः ज्ञानप्रकारः वेदे उच्चशिक्षायाः संशोधनप्रवृत्तौ वा एकः दृढः आधारः भवति। अपि च, विशिष्टविषयकौशलेन सह यानि जीवनोपयोगीनि कौशलानि, यथा - तर्कशक्तिः, संवादकौशलं, नूतना दृष्टिः, व्यक्तित्वविकसनं, मूल्याङ्कनबुद्धिः च इत्येतानि अपि वेदविषयाध्ययनेन विकसितानि भवन्ति। जटिलेऽस्मिन् जीवनसन्दर्भे मानवसमाजस्य उत्कर्षाय वैदिकतत्त्वानाम् अध्ययनं कुर्वन्तः एते छात्राः समृद्धं, फलप्रदम्, अर्थपूर्णं, शान्तिपूर्णं च जीवनं नेतुं समर्थाः भवन्ति।

अधोलिखिताः विकल्पाः वेदस्नातकपाठ्यक्रमे प्रशिक्षितस्य छात्रस्य उद्योगावकाशान् सूचयन्ति—

- अध्यापनम् अनुसंधानञ्च।
- नीतिनिर्माणं शासनञ्च।
- धार्मिकसंस्थासु नियुक्तिः।
- मन्दिरेषु नियुक्तिः।
- सार्वजनिकजीवनं जनप्रतिनिधित्वञ्च।
- पत्रकारितायां तथा समूहमाध्यमेषु कार्यम्।
- सामाजिकसेवा तथा सामाजिककार्यसम्बद्धकार्याणि।
- अभिलेखागारेषु, सङ्ग्रहालयेषु, पुरातत्त्व-अनुसन्धानक्षेत्रेषु च संलग्नता।
- प्रशासनिककार्येषु नियुक्तिः।
- स्ववित्तोपार्जनसामर्थ्यस्य वर्धनम्।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		प्रधानपाठक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: पाणिनीयशिक्षा	4	100-199
2		प्रधानः 1.2: निरुक्तम् (प्रथमाध्यायः)	4	100-199
3		प्रधानः 1.3: पञ्चाङ्गपूजनम्	4	100-199
4		प्रधानः 1.4: यज्ञपात्रपरिचयः	4	100-199
5		प्रधानः 1.5: वैदिकवाङ्मयस्येतिहासः (संहिताब्राह्मणारण्यकोपनिषत्परिचयः) चरणव्यूहः च	4	100-199
6		प्रधानः 1.6: मीमांसापरिभाषा	4	100-199
7		प्रधानः 1.7: निरुक्तम् (द्वितीयाध्यायः)	4	100-199
8		प्रधानः 1.8: वैदिकच्छन्दांसि	4	100-199
9		प्रधानः 1.9: याज्ञवल्क्यशिक्षा	4	100-199
		प्रधानः 1.10: वैदिकवाङ्मयस्येतिहासः (वेदाङ्गस्येतिहासः)		
10	द्वितीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: स्मार्तयागपद्धतिः	4	200-299
11		प्रधानः 2.2: निरुक्तम् (पञ्चमाध्यायः)	4	200-299
12		प्रधानः 2.3: उपनयनोपाकर्मप्रकरणम्	4	200-299
13		प्रधानः 2.4: सभाष्यसूक्ताध्ययनम् - 1	4	200-299
14		प्रधानः 2.5: सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका	4	200-299
15		प्रधानः 2.6: निरुक्तम् (सप्तम-अष्टमाध्यायौ)	4	200-299
		प्रधानः 2.7: अग्निहोत्रब्राह्मणम् (तै.ब्रा. 2.1)		
16	तृतीयवर्षीयाः	प्रधानः 3.1: नीतिमञ्जरी (प्रथमाध्यायः)	4	300-399

17	प्रधानपाठ्यक्रमाः	प्रधानः 3.2: सभाष्यसूक्ताध्ययनम् - 2	4	300-399
18		प्रधानः 3.3: अग्न्याधानं, हविर्यज्ञाः, सोमसंस्थाः च	4	300-399
19		प्रधानः 3.4: निरुक्तम् (9-10 अध्यायौ)	4	300-399
20		प्रधानः 3.5: जैमिनीयन्यायमाला (प्रथमाध्यायः)	4	300-399
21		प्रधानः 3.6: सभाष्यसूक्ताध्ययनम् - 3	4	300-399
22		प्रधानः 3.7: श्रौतयज्ञपरिभाषा (का.श्रौ.सू 1)	4	300-399
23	चतुर्थवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: वैदिकीप्रक्रिया	4	400-499
24		प्रधानः 4.2: सभाष्यसूक्ताध्ययनम् – 4	4	400-499
25		प्रधानः 4.3: शिक्षावल्ली (शाङ्करभाष्यसहिता)	4	400-499
22		प्रधानः 4.4: वैदिकस्वरप्रक्रिया	4	400-499
23		प्रधानः 4.5: स्वाध्यायब्राह्मणम् (तै.आ. 2)	4	400-499
24		प्रधानः 4.6: लघुजातकम्, वास्तुरत्नाकरः	4	400-499
25		प्रधानः 4.7: विवाहप्रकरणम्	4	400-499
26		प्रधानः 4.8: केनोपनिषद् (शाङ्करभाष्यम्)	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षीयाः गौणपाठ्यकमाः	गौणः 1.क.1: रुद्राध्यायः – 1	4	100-199
2		गौणः 1.क.2: रुद्राध्यायः – 2	4	100-199
3		गौणः 1.क.3: नारदीयशिक्षा	4	100-199
4		गौणः 1.क.4: सामवेदभाष्यभूमिका (सायणविरचिता)	4	100-199
5	द्वितीयवर्षीयाः गौणपाठ्यकमाः	गौणः 2.क.1: सभाष्यसूक्ताध्ययनम् - 1	4	200-299
6		गौणः 2.क.2: सभाष्यसूक्ताध्ययनम् - 2	4	200-299
7		गौणः 2.क.3: प्रातिशाख्यविस्तरः	4	200-299
8	तृतीयवर्षीयाः गौणपाठ्यक्रमाः	गौण 3.क.1: माण्डूकी शिक्षा	4	300-399
9		गौण 3.क.2: बौधायनधर्मसूत्रम्	4	300-399
10		गौण 3.क.3: पाकयज्ञाः हविर्यज्ञाश्च	4	300-399
11	चतुर्थवर्षीयाः गौणपाठ्यक्रमाः	गौणः 4.क.1: बृहदवकहडाचक्रम्	4	400-499
12		गौणः 4.क.2: पूजाविधानम्	4	400-499
13		गौणः 4.क.3: आश्वलायनश्रौतसूत्रम् (चिताः अंशाः)	4	400-499
14		गौणः 4.क.4: कात्यायन शुल्बसूत्रम्	4	400-499

प्रथमवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रथमसत्रार्द्धः (Semester-1)

प्रधानः पाठ्यक्रमः (Major) 1.1: पाणिनीयशिक्षा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वर्णोत्पत्तिविधेः ज्ञानप्रदानम्।
2. उच्चारण-स्वरविशिष्टोच्चारणविधेः च अवगमनम्।
3. स्वरोच्चारणे हस्तप्रक्षेपविधेः अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वर्णस्वरकालस्थानादिभेदसहितं शुद्धशब्दोच्चारणं कर्तुं समर्थाः भविष्यन्ति।
2. वर्णोच्चारणविधिं प्रतिपादयितुं सिद्धाः भविष्यन्ति।
3. पाठकगुणान् वर्णयितुं समर्थाः भविष्यन्ति।
4. दुष्टशब्दोच्चारणे अनिष्टत्वप्राप्तिर्भवतीति निरूपणं कर्तुं सिद्धाः भविष्यन्ति।
5. स्वरोच्चारणकाले हस्तप्रक्षेपविधिं प्रदर्शयितुं सिद्धाः भविष्यन्ति
6. वर्णानां प्रयत्नद्वैविध्यप्रतिपादने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	पाणिनीयशिक्षा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रथमश्लोकतः पञ्चदशश्लोकपर्यन्तम्। **श्रेयोऽङ्कः १**

- मङ्गलाचरणं, प्रतिज्ञा, वर्णसङ्ख्याकथनञ्च।
- वर्णोत्पत्तिः, वर्णविभागः, पञ्चधा वर्णभेदश्च।
- स्वरभेदः, कालभेदः, स्थानभेदः, ऊष्मणः अष्टधा गतिश्च।

अन्वितिः २. षोडशश्लोकतः एकत्रिंशच्छलोकपर्यन्तम्। **श्रेयोऽङ्कः १**

- वर्णोच्चारणे अष्टौ स्थानानि।
- सवर्णसंज्ञोपयोगिस्थानं, वर्णानां विवृतत्वादयः।
- हकारादिपरानुस्वारोच्चारणविधिः।

- अनुस्वारादेः उच्चारणविधिः।
- सर्ववर्णानां सामान्योच्चारणविधिः।
- रङ्गवर्णोच्चारणविधिः तत्फलञ्च।

अन्वितिः ३. द्वात्रिंशच्छलोकतः चतुश्चत्वारिंशच्छलोकपर्यन्तम्। श्रेयोऽङ्कः १

- अधमपाठकवर्णनम्।
- पाठकगुणाः।
- उच्चारणनियमाः, प्रातरादिकालत्रये वर्णोच्चारणविधिश्च।
- वर्णानामाभ्यन्तरप्रयत्नः बाह्यप्रयत्नश्च।
- वेदाङ्गानि।
- स्वरेषु विशिष्टोच्चारणविधिः।

अन्वितिः ४. पञ्चचत्वारिंशच्छलोकतः ग्रन्थसमाप्तिपर्यन्तम्। श्रेयोऽङ्कः १

- नवपदशय्या, स्वरोच्चारणकाले हस्तप्रक्षेपविधि।
- मात्राकालः, अशिष्टाध्यापकाधीततत्त्वादिदोषयुक्तपठनञ्च।
- सम्प्रदायशुद्धवेदाध्ययने फलम्।
- शब्दस्य स्वरवर्णादिदुष्टत्वे अनिष्टम्।
- दुष्टोच्चारणस्य निन्दनं, ग्रन्थान्ते मङ्गलञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शिवराज आचार्यः, कौण्डिन्न्यायनः (व्याख्याकारः), (2021), पाणिनीयशिक्षा, चौखम्बा विद्याभवन।
2. शर्मा, बालकृष्ण, सं., *पाणिनीयशिक्षा* (बच्चूलाल अवस्थीकृत भाष्यसहिता), कालिदास अकादमी।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: निरुक्तम् (प्रथमाध्यायः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. निरुक्तस्य प्रथमाध्यायस्य अध्ययनेन दुरूहवैदिकशब्दानाम् अवगमनम्।
2. नामाख्यातादिविषयाणां ज्ञानप्रदानम्।
3. शब्दभेदः तथा शब्दानाम् आख्यातजत्वबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिकशब्दानां सस्वरोच्चारणं कर्तुं सिद्धाः भविष्यन्ति।
2. उपसर्गाणां अर्थविवेचनं कर्तुं समर्थाः भविष्यन्ति।
3. षड्भावविकारान् निरूपयितुं शक्ष्यन्ति।
4. शब्दानाम् आख्यातजत्वम् इति प्रतिपादयितुं दक्षाः भविष्यन्ति।
5. निरुक्तस्य उपयोगितायाः महत्त्वस्य च वर्णनं कर्तु सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	निरुक्तम् (प्रथमाध्यायः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. निघण्टुः। **श्रेयोऽङ्कः १**

- निघण्टोः प्रथमतः पञ्चमाध्यायपर्यन्तानां वैदिकशब्दानां सस्वरोच्चारणं कण्ठस्थीकरणञ्च।

अन्वितिः २. प्रथमाध्याये १-२ पादौ। **श्रेयोऽङ्कः १**

- चत्वारि पदजातानि।
- षड्भावविकाराः।
- उपसर्गाणाम् अर्थविवेचनम्।
- निपातानाम् अर्थनिश्चयः।

अन्वितिः ३. प्रथमाध्याये ३-४ पादौ। **श्रेयोऽङ्कः १**

- शब्दभेदप्रकरणं, शब्दानाम् आख्यातजत्वञ्च।

अन्वितिः ४. प्रथमाध्याये ५-६ पादौ। **श्रेयोऽङ्कः १**

- निरुक्तस्य उपयोगित्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्यासागर, छज्जूरामशास्त्री, महामहोपाध्याय पण्डित, (2020), *निरुक्तपञ्चाध्यायी*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशन्स्।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: पञ्चाङ्गपूजनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पञ्चाङ्गपूजनस्य ज्ञानप्रदानम्।
2. पञ्चाङ्गपूजनविधेः परिचयप्रदानम्।
3. पञ्चाङ्गपूजनविधौ सामग्रीणां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. गणपतिपूजनविधेः निरूपणं कर्तुं सिद्धाः भविष्यन्ति।
2. पुण्याहवाचनं कर्तुं समर्थाः भविष्यन्ति।
3. षोडशोपचारपूजनं यथाविधि कर्तुं दक्षाः भविष्यन्ति।
4. नान्दीश्राद्धं तत्पूर्ववित्तान्तं च कथयितुं समर्थाः भविष्यन्ति।न
5. सप्तवसोर्धारापूजनं मातृकापूजनं च कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	पञ्चाङ्गपूजनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. गणपतिपूजनम्। **श्रेयोऽङ्कः १**

- पूजनपूर्वसज्जता, सामग्रीसङ्कलनं (षोडशोपचारपूजनसामग्री) च।
- गणपतिमण्डलनिर्माणं, गणपतिस्थापनं, गणपतेः ध्यानावाहनादिश्च।
- षोडशोपचारपूजनं, मङ्गलनीराजनं, मन्त्रपुष्पाञ्जलिश्च।

अन्वितिः २. पुण्याहवाचनम्। **श्रेयोऽङ्कः १**

- पूजनपूर्वसज्जता, सामग्रीसङ्कलनं (गन्ध, धान्य, मृत्तिका, पञ्चपल्लवादि) च।

- कलशस्थापनं पूजनञ्च, स्वस्तिवाचनम्, आशीर्वचनादिप्रयोगश्च।

अन्वितिः ३. मातृकापूजनं, सप्तवसोर्धारापूजनम्, आयुष्यमन्त्रजपः। **श्रेयोऽङ्कः १**

- पूजनपूर्वसज्जता, सामग्रीसङ्कलनं (षोडशोपचारपूजनसामग्री) च।
- आदौ वैश्वदेवप्रयोगः, षड्विनायकानामावाहनञ्च।
- प्राणप्रतिष्ठापूर्वकषोडशोपचारपूजनम्।
- मातृकापूजनार्थं स्थलनिर्णयः, गोधूमप्रतिमायां षोडशोपचारैः गणपतेः पूजनञ्च।
- गौर्यादिमातॄणां ध्यानावाहनादिषोडशोपचारपूजनञ्च।
- सगुडेन घृतेन क्रमशः सप्तवसोर्धाराः, षोडशोपचारपूजनम्, आयुष्यमन्त्रजपश्च।

अन्वितिः ४. नान्दीश्राद्धः, ऋत्विग्वरणम्। **श्रेयोऽङ्कः १**

- कर्मपूर्वसज्जता, सामग्रीसङ्कलनं (कुश, दूर्वा, तिलादि) च।
- क्रमशः षट् कुशबटून् दूर्वाकाण्डानि वा संस्थाप्य- क्षणदानं, पाद्यदानं, आसनदानं, गन्धादिदानं, भोजननिष्क्रयद्रव्यदानञ्च।
- सक्षीरयवमुदकदानम्, आशीर्ग्रहणं, दक्षिणादानञ्च।
- विसर्जनम्, अनुव्रजनं, न्यूनातिरिक्तदोषपरिहारः, आचार्यप्रार्थना, आचार्यवरणं, कङ्कणबन्धनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शास्त्री, यज्ञदत्त दुर्गाशंकर, *बृहद्ब्रह्मनित्यकर्मसमुच्चयः*, मुम्बई : जगदीश्वर प्रिंटिंग प्रेस।
2. मिश्र, पं. लालबिहारी, नित्यकर्म पूजाप्रकाश, गोरखपुर : गीता प्रेस।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: यज्ञपात्रपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. यज्ञपात्राणां विवेचनम्।
2. यज्ञकर्मणि तेषां महत्त्वज्ञानम्।
3. विविधयागेषु पात्राणामुपयोगपरिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आधानपात्राणां परिचयं तत्प्रयोगं च वर्णयिष्यन्ति।
2. इष्टिपात्रपरिचयं प्रदातुं समर्थाः भविष्यन्ति।
3. सौमिकपात्राणां परिचयं प्रदातुं समर्थाः भविष्यन्ति।
4. सम्भाराणां प्रयोगवैविध्यं कथयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रमुखः पाठ्यक्रमः (Major) 1.4	**यज्ञपात्रपरिचयः**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आधानपात्रपरिचयः। **श्रेयोऽङ्कः १**

- अरणिद्वयं, मन्थिप्रमन्थिनौ, पूर्णपात्रं, दर्व्यादीनि।

अन्वितिः २. इष्टिपात्रपरिचयः। **श्रेयोऽङ्कः १**

- स्रुवः, स्फ्यः, जुहूः, उपभृत्, कपालाः, ध्रुवादीनि।

अन्वितिः ३. सौमिकपात्रपरिचयः। **श्रेयोऽङ्कः १**

- आज्यस्थाली, इडापात्री, उद्गातृचमसः, मैत्रावरुणपात्राणि।

अन्वितिः ४. सम्भारपरिचयः। **श्रेयोऽङ्कः १**

- पार्थिवसंभारः, वार्क्ष्र्यसंभारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शास्त्री, पी. एन्. पट्टाभिराम, पं., (1992), *यज्ञतत्त्वप्रकाशः*, दिल्ली : मोतीलाल बनारसीदास पब्लिशिंग हाउस।
2. द्विवेदी, मनोहरलाल, डॉ., (2004), *कात्यायन यज्ञपद्धति विमर्श*, नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
3. मूर्तिः, श्रीपाद सत्यनारायण, आचार्यः, (2007), *यज्ञपात्रपरिचयः*, तिरुपतिः : राष्ट्रिय संस्कृत विद्यापीठम्।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: वैदिकवाङ्गयस्येतिहासः (संहिताब्राह्मणारण्यकोपनिषत्परिचयः) चरणव्यूहः च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकवाङ्गयस्य विस्तृतरूपेण परिचयप्रदानम्।
2. संहिता-ब्राह्मण-आरण्यक-उपनिषदां परिचयप्रदानम्।
3. चरणव्यूहग्रन्थे प्रतिपादितानां विषयाणां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिकवाङ्गयस्य ज्ञानं प्राप्स्यन्ति।
2. वैदिकवाङ्गयेतिहासं ज्ञातुं समर्थाः भविष्यन्ति।
3. चरणव्यूहग्रन्थे प्रतिपादितान् विषयान् ज्ञास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	**वैदिकवाङ्गयस्येतिहासः (संहिताब्राह्मणारण्यकोपनिषत्परिचयः) चरणव्यूहः च**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संहिताब्राह्मणभागः। **श्रेयोऽङ्कः १**

- ऋग्वेदः, ऋग्वेदस्य शाखाः ब्राह्मणानि तेषु प्रतिपादितविषयाश्च।
- शुक्लयजुर्वेदः, शुक्लयजुर्वेदस्य शाखाः, ब्राह्मणानि, तेषु प्रतिपादितविषयाश्च।
- कृष्णयजुर्वेदः, कृष्णयजुर्वेदस्य शाखाः, ब्राह्मणानि, तेषु प्रतिपादितविषयाश्च।
- सामवेदः, सामवेदस्य शाखाः, ब्राह्मणानि, तेषु प्रतिपादितविषयाश्च।
- अथर्ववेदः, अथर्ववेदस्य शाखाः, ब्राह्मणानि, तेषु प्रतिपादितविषयाश्च।

अन्वितिः २. आरण्यकोपनिषद्भागः। **श्रेयोऽङ्कः १**

- ऋग्वेदस्य आरण्यकानि, उपनिषदः, तेषां प्रतिपादनविषयाश्च।
- शुक्लयजुर्वेदस्य आरण्यकानि, उपनिषदः, तेषां प्रतिपादनविषयाश्च।

- कृष्णयजुर्वेदस्य आरण्यकानि, उपनिषदः, तेषां प्रतिपादनविषयाश्च।
- सामवेदस्य आरण्यकानि, उपनिषदः, तेषां प्रतिपादनविषयाश्च।
- अथर्ववेदस्य आरण्यकानि, उपनिषदः, तेषां प्रतिपादनविषयाश्च।

अन्वितिः ३. चरणव्यूहे ऋग्वेदयजुर्वेदखण्डौ। **श्रेयोऽङ्कः १**

- महीदासभाष्यसहितः ऋग्वेदखण्डः।
- महीदासभाष्यसहितः यजुर्वेदखण्डः।

अन्वितिः ४. चरणव्यूहे सामवेदाथर्ववेद-फलश्रुतिखण्डाः। **श्रेयोऽङ्कः १**

- महीदासभाष्यसहितः सामवेदखण्डः।
- महीदासभाष्यसहितः अथर्ववेदखण्डः।
- महीदासभाष्यसहितः फलश्रुतिखण्डः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जगदीशचन्द्रमिश्र। (2018)। *वैदिकवाङ्मयस्य इतिहासः*। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. उमेशचन्द्रशर्मा (संपा०)। (1978)। *चरणव्यूहसूत्रम् (आचार्य महिदासकृत भाष्यसहितम्)*। अलीगढ़ : विवेक पब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान। (2023)। *वेदकल्पतरु*। नई दिल्ली : राष्ट्रीय पुस्तक न्यास।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester – 2)

प्रधानः पाठ्यक्रमः (Major) 1.6: मीमांसापरिभाषा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मीमांसायाः परिचयप्रदानम्।
2. मीमांसापरिभाषाग्रन्थस्य परिचयसम्पादनम्।
3. धर्माधर्मयोः परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मीमांसापरिभाषानुसारं धर्माधर्मनिरूपणं कर्तुं शक्ष्यन्ति।
2. विधेः स्वरूपं प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. श्रुत्यादिषट्प्रमाणानां निरूपणं कर्तुं सिद्धाः भविष्यन्ति।
4. यागमहोशब्दार्थविचारमुपस्थापयितुं शक्ष्यन्ति।
5. भावनास्वरूपं सभेदं वक्तुं प्रभविष्यन्ति।
6. वेदस्य प्रामाण्यत्वविवेचनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	मीमांसापरिभाषा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. धर्माधर्मनिरूपणतः परिसङ्ख्याविधिपर्यन्तम्। **श्रेयोऽङ्कः १**

- धर्माधर्मनिरूपणं, वेदद्वैविध्यं, ब्राह्मणवाक्यभेदाः, कर्मोत्पत्तिवाक्यञ्च।
- गुणवाक्यं, फलवाक्यं, फलायगुणवाक्यं, सगुणकर्मोत्पत्तिवाक्यञ्च।
- सफलकर्मोत्पत्तिवाक्यं, प्रयोगविधिः, अपूर्वसाधनञ्च।
- उत्पत्त्यपूर्वकल्पना, यजिपदाश्रवणेऽपि यागकल्पनञ्च।
- लिङ्गाद्यभावेऽपि विधायकत्वं, त्रिकापूर्वाद्युत्पत्तिश्च।
- विधित्रैविध्यम्, अपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिश्च।

अन्वितिः २. श्रुत्यादिषट्प्रमाणनिरूपणतः प्रतिपत्तिकर्मस्वरूपपर्यन्तम्। **श्रेयोऽङ्कः १**

- श्रुत्यादि षट् प्रमाणानि-
    - श्रुतिः
    - लिङ्गम्
    - वाक्यम्
    - प्रकरणम्
    - स्थानम्
    - समाख्याप्रकरणम्।
- श्रुतिप्राबल्यविचारः, लिङ्गादिप्राबल्यविचारश्च।
- अङ्गनिरूपणम्, अङ्गलक्षणञ्च।
- सन्निपत्योपकारकाङ्गम्, आरादुपकारकमङ्गञ्च।
- कर्मभेदविचारः, प्रतिपत्तिकर्मस्वरूपं तद्भेदाश्च।

अन्वितिः ३. यागहोमशब्दार्थविचारतः ज्योतिष्टोमादीनां नामत्वप्रतिपादनपर्यन्तम्। **श्रेयोऽङ्कः १**

- यागमहोशब्दार्थविचारः, होमयागयोर्यौगपद्यञ्च।
- उपयोक्ष्यमाणसंस्कारभेदाः, प्रतिपत्तेर्लक्षणान्तरञ्च।
- अर्थगुणकर्मणोः प्राधान्यविचारः, गुणकर्मणश्चातुर्विध्यम्, अर्थकर्मणस्त्रैविध्यञ्च।
- काम्यकर्मणस्त्रैविध्यम्, विधेर्विधायकत्वविचाश्च।
- आर्थीभावना, शाब्दीभावना, भावनालक्षणं, ज्योतिष्टोमादीनां नामत्वप्रतिपादनञ्च।

अन्वितिः ४. अर्थवादविचारतः ग्रन्थसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- अर्थवादविचारः, मन्त्रविचारश्च।
- परिसंख्यादोषत्रयं, विकल्पे दोषाष्टकञ्च।
- वेदस्य प्रामाण्यविचारः।
- कर्मभेदनिरूपणं, प्रमेयादिविचारश्च।
- क्रमनिरूपणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मुसलगांवकर, गजानन शास्त्री, डॉ., (2014), *मीमांसा परिभाषा*, वाराणसी : चौखम्बा कृष्णदास अकादमी।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.7: निरुक्तम् (द्वितीयाध्यायः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. निर्वचनसिद्धान्तानाम् उपदेशः।
2. विविधवैदिकपदानां निर्वचनबोधनम्।
3. वेदार्थज्ञानस्य आवश्यकतायाः अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. निर्वचनसिद्धान्तानां वर्णने सिद्धाः भव।
2. योग्य-वर्ज्यशिष्याणां विश्लेषणे समर्थाः भविष्यन्ति।
3. साधारणादिशब्दानां निर्वचनं वक्तुं समर्थाः भविष्यन्ति।
4. रश्मिमेघादिनामनिर्वचनं कर्तुं शक्ष्यन्ति।
5. वाग्-उदक-नदी-अश्वादिशब्दानां निरुक्तप्रतिपादितनिर्वचनं वर्णने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रमुखः पाठ्यक्रमः (Major) 1.7	निरुक्तम् (द्वितीयाध्यायः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. द्वितीयाध्याये 1-3 पादाः। **श्रेयोऽङ्कः १**

- निर्वचनलक्षणम्।
- वर्ज्यग्राह्यशिष्याणां बोधनम्।
- हिरण्यादिशब्दनिर्वचनम्।

अन्वितिः २. द्वितीयाध्याये 4-5 पादौ। **श्रेयोऽङ्कः १**

- साधारणादिशब्दानां निर्वचनम्।
- रश्मिनाम्नां निर्वचनम्।
- वृत्रादिशब्दनिर्वचनम्।

अन्वितिः ३. द्वितीयाध्याये षष्ठपादः। **श्रेयोऽङ्कः १**

- रश्मिनामादिनिर्वचनम्।
- मेघादिनामनिर्वचनम्।

अन्वितिः ४. द्वितीयाध्याये सप्तमपादः। **श्रेयोऽङ्कः १**

- वाङ्नामनिर्वचनम्।
- उदक-नदी-अश्वादिशब्दानां निर्वचनम्।
- ज्वलन्नमनिर्वचनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्यासागर, पण्डितछज्जूरामशास्त्री, महामहोपाध्याय, (2020), *निरुक्तपञ्चाध्यायी*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशन्स्।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.8: वैदिकच्छन्दांसि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकलौकिकछन्दसां परस्परं प्रभेदस्य ज्ञानसम्पादनम्।
2. मन्त्रार्थज्ञाने वैदिकछन्दसां ज्ञानसम्पादनम्।
3. वैदिकछन्दसां परिचयसम्पादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविधवैदिकछन्दसां परिचयकथने समर्थाः भविष्यन्ति।
2. विनियोगनिर्माणे समर्थाः भविष्यन्ति।
3. छन्दसां विशेषान् निरूपयितुं शक्ष्यन्ति।
4. छन्दःसन्देहे निर्णयप्रकारं प्रतिपादयितुं सिद्धाः भविष्यन्ति।
5. पिङ्गलच्छन्दःशास्त्रोक्तगणपरिभाषा, गणसञ्ज्ञादिविषयाणां निरूपणे समर्थाः भविष्यन्ति।
6. छन्दसां धातवः, देवतादिविषये विचारश्चेत्यादिप्रतिपादनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.8	वैदिकच्छन्दांसि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ऋक्प्रातिशाख्ये प्रथमं छन्दःपटलम्। **श्रेयोऽङ्कः १**

- प्रजापतेः देवानाम् असुराणां च सप्त छन्दांसि।
- ऋषीणां छन्दांसि, यजुषां साम्नाम् ऋचां ब्रह्मणश्च छन्दांसि।
- ऋषीणां छन्दस्सु वर्गाणां त्रिविधत्वम्।
- ऋषीणां छन्दसामधिकारः।
- गायत्री तद्भेदाश्च।
- उष्णिक् तद्भेदाश्च।

- अनुष्टुप् तद्भेदाश्च।
- बृहती तद्भेदाश्च।
- पङ्क्तिस्तद्भेदाश्च।
- त्रिष्टुप् तद्भेदाश्च।
- जगती तद्भेदाश्च।
- अतिच्छन्दसां द्वौ वर्गौ तयोः उदाहरणानि च।

अन्वितिः २. ऋक्प्रातिशाख्ये द्वितीयं छन्दःपटलम्। **श्रेयोऽङ्कः १**

- छन्दसां केचिद्विशेषा।
- निचृत् संज्ञा भुरिक् संज्ञा च।
- स्वराट् संज्ञा विराट् संज्ञा च।
- छन्दसां देवताः, छन्दसां वर्णाश्च।
- गायत्र्याः पूर्वाणि मादीनि पञ्च छन्दांसि तेषां वैराजानि च।
- पादवृत्ताक्षरेषु सन्देहास्पदानामृचां छन्दोनिर्णयप्रकारः।
- छन्दोदृष्ट्या न्यूनाक्षराणां पादानां पूरणार्थं सन्धिविच्छेदो व्यवधानं वा।
- पादानां विभागप्रकारः।
- पादानां विषये इतरे विशेषाः।

अन्वितिः ३. पिङ्गलच्छन्दःशास्त्रे प्रथमद्वितीयाध्यायौ। **श्रेयोऽङ्कः १**

- गणादिपरिभाषा, गणसंज्ञाः, गणदेवताः, गणफलानि, गणेषु शत्रुमित्रादिः, गणप्रयोगे फलञ्च।
- दुष्टगणादिदोषापवादः, लगसंज्ञा, लगसङ्केतरेखालक्षणं, गुरुत्वापवादश्च।
- क्वचित्पादान्तस्य लघुत्वं, द्विमात्रस्य गुरुत्वं, सङ्ख्योपलक्षसंज्ञाश्च।
- धीश्रीरित्यादिपदानामर्थाः।
- गायत्रीभेदाः, तत्प्रदर्शनोपायश्च।
- लक्षणव्यभिचारे विचारः।
- गायत्र्याः अष्टत्रिंशद्भेदाः।

अन्वितिः ४. पिङ्गलच्छन्दःशास्त्रे तृतीयाध्यायः। **श्रेयोऽङ्कः १**

- पादपूरणप्रकारः।

- गायत्र्यादिपादाक्षरसङ्ख्या, छान्दसमेकादिपादत्वं, पञ्चादिपादानि छन्दांसि च।
- चतुष्पादादिगायत्रीलक्षणं, गायत्रीपदनिर्वचनञ्च।
- उष्णिगधिकारः, उष्णिक्पदनिर्वचनञ्च।
- अनुष्टुबधिकारः, अनुष्टुप् पदनिरुक्तिः, बृहत्यधिकारश्च।
- पङ्क्त्यधिकारः।
- त्रिष्टुब्जगत्यधिकारः, त्रिष्टुप् पदनिर्वचनं, बहूनाक्षरायया अपि त्रिष्टुप्त्वं, जगतीपदनिर्वचनं, शङ्कुमत्त्यादिच्छन्दोविशेषाश्च।
- छन्दःसन्देहे निर्णयप्रकारः, छन्दसां देवताः, छन्दसां स्वराः, छन्दसां वर्णाः, छन्दसां गोत्राणि च।
- छन्दसां धातवः, देवतादिविषये विचारश्च।
- मतान्तरविरोधपरिहारः।

निर्धारिता: ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीपिङ्गलनाग, (1938), छन्दःशास्त्रम् (श्रीहलायुधभट्टविरचितया मृतसञ्जीवनाख्यया वृत्त्या समेतम्), मुम्बई : निर्णयसागरमुद्रणालयः।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.9: याज्ञवल्क्यशिक्षा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकशिक्षायाः मूलाधारस्यावबोधः।
2. उदात्तानुदात्तस्वरितस्वराणामवबोधनम्।
3. वर्णानां भेदज्ञानम्।
4. वर्णोच्चारणस्थानानां सम्यग्बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. त्रैस्वर्यलक्षणव्याख्यानप्रतिज्ञानां प्रतिपादने कर्तुं शक्ष्यन्ति।
2. हस्तादिचालनविधौ निपुणाः भविष्यन्ति।
3. संयुक्तवर्णेषु हस्तचालनव्यवस्थादीनां वर्णनं कर्तुं शक्ष्यन्ति।
4. वर्णोच्चारणस्य नियमान् वक्तुं समर्थाः भविष्यन्ति।
5. रङ्गस्वरोच्चारणप्रकारं वर्णनं कर्तुं सिद्धाः भविष्यन्ति।
6. याज्ञवल्क्यशिक्षाग्रन्थस्थविषयप्रतिपादने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रमुखः पाठ्यक्रमः (Major) 1.9	याज्ञवल्क्यशिक्षा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आरम्भतः अध्ययनविधिसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- मङ्गलाचरणम्।
- त्रैस्वर्यलक्षणव्याख्यानप्रतिज्ञा।
- स्वराणां वर्णाः।
- दैवतानि जातयश्च।
- गोत्राणि, छन्दांसि च।

अन्वितिः २. हस्तचालनविधितः स्वरसंहिताविधिसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- प्रादेशस्वरूपम्।
- मनुष्यादितीर्थनिरूपणम्।
- ऊष्मस्वरूपभेदाः।
- हस्तादिचालने मल्लशर्मोक्तविशेषादयः।

अन्वितिः ३. वर्णप्रकरणे आरम्भतः अभिनिधानशिक्षा….. पर्यन्तम्। **श्रेयोऽङ्कः १**

- वर्णानामुद्देशः।
- सन्धिभेदाः।
- ॐकारस्य प्लुतत्वनियमः।
- संयुक्तवर्णेषु हस्तचालनव्यवस्थादयः।

अन्वितिः ४. रङ्गस्वरोच्चारणप्रकारः………. आरभ्य ग्रन्थसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- रङ्गस्वरोच्चारणप्रकारः।
- पदोच्चारणे विशेषः।
- संयोगपिण्डानां साप्तविध्यम्।
- दुष्टोच्चारणनिषेधादयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शास्त्री, श्रीअमरनाथ, (1994), *याज्ञवल्क्यशिक्षा*, वाराणसी : कृ.ब. पावगी हितचिन्तक प्रेस रामघाट।
2. झा, डॉ. नरेश, (2017), *याज्ञवल्क्यशिक्षा*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. Mishra, Dr. Manoj Kumar, (2012), Yajnavalkya Siksa, Tirupati : SV Vedic University.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major)1.10: वैदिकवाङ्मयस्येतिहासः (वेदाङ्गस्येतिहासः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकवाङ्मयेतिहासयोः ज्ञानसम्पादनम्।
2. विविधशिक्षाणां परिचयप्रदानम्।
3. वेदाङ्गस्य विस्तृतेन परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिकवाङ्मयस्येतिहासं वक्तुं समर्थाः भविष्यन्ति।
2. शिक्षासु प्रतिपादितान् विषयान् व्याख्यास्यन्ति।
3. वेदाङ्गानां प्रयोजनानि वक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.10	वैदिकवाङ्मयस्येतिहासः (वेदाङ्गस्येतिहासः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शिक्षावेदाङ्गेतिहासः। **श्रेयोऽङ्कः १**

- शिक्षायाः अवश्यकता, इतिहासश्च।
- ऋग्वेद-यजुर्वेदयोः शिक्षाः।
- कृष्णयजुर्वेदस्य शिक्षाः।
- सामवेदस्य शिक्षाः।
- अथर्ववेदस्य शिक्षाः।

अन्वितिः २. निरुक्तव्याकरणवेदाङ्गेतिहासः। **श्रेयोऽङ्कः १**

- निरुक्तस्यावश्यकता इतिहासश्च।
- निरुक्ते अध्यायविभागः, निरुक्तव्याख्याकाराश्च।
- व्याकरणशास्त्रस्यावश्यकता।
- व्याकरणस्येतिहासः, व्याकरणपरम्परा, व्याकरणशास्त्रस्य ग्रन्थाः, तेषां व्याख्याः च।

अन्वितिः ३. छन्दोज्यौतिषवेदाङ्गेतिहासः। **श्रेयोऽङ्कः १**

- छन्दःशास्त्रस्येतिहासः।
- ज्यौतिषशास्त्रपरम्परा, ज्यौतिषवेदाङ्गस्येतिहासश्च।
- स्कन्धत्रयं, ज्यौतिषग्रन्थाः, तेषां व्याख्याः च।

अन्वितिः ४. कल्पवेदाङ्गेतिहासः। **श्रेयोऽङ्कः १**

- कल्पवेदाङ्गस्यावश्यकता, कल्पवेदाङ्गस्य विभागाश्च।
- श्रौतसूत्राणि तेषां व्याख्याः च।
- धर्मसूत्राणि तेषां व्याख्याः च।
- गृह्यसूत्राणि तेषां व्याख्याः च।
- शुल्बसूत्राणि तेषां व्याख्याः च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जगदीशचन्द्रमिश्र। (2018)। *वैदिकवाङ्मयस्य इतिहासः*। वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षि सान्दीपनि राष्ट्रीय वेद विद्या प्रतिष्ठान। (2023)। *वेदकल्पतरु*। नई दिल्ली : राष्ट्रीय पुस्तक न्यास।

द्वितीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

तृतीयसत्रार्द्धः (Semester – 3)

प्रधानः पाठ्यक्रमः (Major) 2.1: स्मार्तयागपद्धतिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयज्ञानपरम्परायां कर्मकाण्डविधौ चण्डीपूजनपूर्वकं चण्डीहोमविधेः तथा रुद्रपूजनपूर्वकं रुद्राभिषेकस्य रुद्रहोमविधेश्च अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. चण्डीपूजनविधौ पात्रासादनपूर्वकं यन्त्रस्थापनं, पीठपूजनादिविचाराणां च प्रतिपादने दक्षाः भविष्यन्ति।
2. विविधोपचारैः आवरणपूजासहितं हवनविधिं निरूपयिष्यन्ति।
3. लघुन्यासमहान्यासपूर्वकं पूजनं पारायणं च कर्तुं समर्थाः भविष्यन्ति।
4. यथाविधिः रुद्रपूजनं कर्तुं सिद्धाः भविष्यन्ति।
5. रुद्रयागपद्धतिं वर्णयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	**स्मार्तयागपद्धतिः**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. चण्डीपूजनपद्धतिः। **श्रेयोऽङ्कः १**

- सङ्कल्पः, देवीपूजाप्रयोगश्च।
- एकादशन्यासप्रयोगः, पात्रासादनप्रयोगश्च।
- सामान्यविशेषार्घ्यप्रदानं, पीठपूजा च।
- यन्त्रदेवतास्थापनं, देवीराजोपचारपूजाप्रयोगश्च।
- दुर्गासप्तशतीपारायणविधिः।

अन्वितिः २. चण्डीयागपद्धतिः। **श्रेयोऽङ्कः १**

- नवचण्डीशतचण्डीसहस्रचण्डीहोमप्रयोगाः।

अन्वितिः ३. रुद्रपूजनपद्धतिः। **श्रेयोऽङ्कः १**

- लघुन्यास-महान्यासप्रयोगौ।
- रुद्रपूजनविधिः।
- रुद्रपारायणविधिः।

अन्वितिः ४. रुद्रयागपद्धतिः। **श्रेयोऽङ्कः १**

- कुण्डपूजनप्रयोगः।
- होमात्मकरुद्रप्रयोगः।
- रुद्रहोमविधिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शास्त्री, यज्ञदत्त दुर्गाशंकर, *बृहद्ब्रह्मनित्यकर्मसमुच्चयः*, मुम्बई : जगदीश्वर प्रिंटिंग प्रेस।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: निरुक्तम् (पञ्चमाध्यायः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. निरुक्तशास्त्रस्य पञ्चमाध्याये आगतानां निघण्टुशब्दानां निरुक्तिसम्पादनम्।
2. अनवगतसंस्काराणां शब्दानां निर्वचनमाध्यमेन वास्तविकस्य अर्थस्य ज्ञानप्रदानम्।
3. "अनेकार्थानि एकशब्दानि" सिद्धान्तस्य स्फुटीकरणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. निघण्टुशब्दानां निर्वचनं कर्तुं शक्ष्यन्ति।
2. अनवगतसंस्काराणां शब्दानाम् अर्थसम्पादने समर्थाः भविष्यन्ति।
3. मन्त्रार्थसम्पादने दक्षाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	निरुक्तम् (पञ्चमाध्यायः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पञ्चमाध्याये प्रथमः पादः। **श्रेयोऽङ्कः १**

